309sk17

# 17

# कल्पनाकीर्तिः विजयते

धन्या हि अस्माकं भारतभूमिः या महद्भिः विभूतिभिः अलङ्कृता। अस्यां धरण्याम् अनेके विद्वांसः, वैज्ञानिकाः चिन्तकाः, कलामर्मज्ञाः, ज्योतिर्विदः जन्म लब्धवन्तः देशं च गौरवान्वितं कृतवन्तः। प्राचीनकाले एव आर्यभट्टः वराहमिहिरादयः वैज्ञानिकाः अन्तरिक्षविषये अमूल्यान् सिद्धान्तान् आविष्कृतवन्तः। अद्यत्वे तु उपग्रहयानादीनां साहाय्येन विविधानि शोधकार्याणि प्रचलन्ति। अस्माकं कल्पनाचावला अपि अन्तरिक्षशोधकार्येषु संलग्ना स्वजीवनं व्यतीतवती। अन्ते च अन्तरिक्षयाने दुर्घटनायां स्वप्राणान् त्यक्तवती। वयम् अत्र तस्याः साहसपूर्णकार्याणां विषये पठामः।

## उद्देश्यानि

इमं पाठं पठित्वा भवान्

- कल्पनाचावलामहाभागायाः परिचयं लेखितुं शक्ष्यति;
- अन्तरिक्षयात्रायाः तस्याः उपलब्धीः ज्ञातुं समर्थः भविष्यति;
- क्त–क्तवतुप्रत्ययान्तपदानां रूपाणि ज्ञात्वा वाक्यप्रयोगं कर्तुं शक्तः भविष्यति;
- कर्तृपदैः सह क्रियापदानि योजयितुं सक्षमः भविष्यति;
- सह–अधि–प्रति–नमः इत्यादीनां योगे उपपदविभक्तीनां प्रयोगं करिष्यति;
- 'इदम्' अदस्, विद्वस् शब्दानां रूपाणि लेखिष्यति।
- पाठे प्रयुक्तानां सूक्तीनां चयनं करिष्यति।





## क्रियाकलापः

चित्रगतानां नारीणां नामानि तासां विशिष्टतायाः क्षेत्राणि च लिखत।



17.1

..............................

..............................



17.2

..............................

..............................



17.3

..............................

..............................



17.4

..............................

..............................

## 17.1 मूलपाठः

### कल्पनाकीर्तिः विजयते

अधुना मूलपाठं ध्यानेन पठामः

वैभवः – भगिनि! पश्य चन्द्रतारकैः सुशोभितम् आकाश–मण्डलं कियत् राजते।

विभा – भ्रातः। न केवलमिदम्। आकाशमण्डले तु विविधानि ग्रहनक्षत्राणि सन्ति। अस्माकं पृथ्वी अपि तेषु एव अन्यतमा वर्तते। यदि अन्यस्मात् ग्रहात् अवलोक्यते तर्हि एषा अपि अन्यानि तारकाणि इव देदीप्यमाना प्रतीयते।

**शब्दार्थाः**

कियत् = कितना

राजते = सुशोभित होता है।

अन्यतमा = विशिष्ट

अवलोक्यते = देखा जाता है

तर्हि = तो

देदीप्यमाना = चमकती हुई

प्रतीयते = प्रतीत होती है



17.5

वैभवः – अये! त्वया कथं ज्ञायते?

विभा – भ्रातः! किं न जानासि यत् अनेके वैज्ञानिकाः अन्तरिक्षात् पृथिव्याः सौन्दर्यं वर्णितवन्तः।

वैभवः – किम् अस्माकं देशात् कोऽपि अन्तरिक्षं न गतवान्।

विभा – अरे! मा एवं वद। 1984 तमे वर्षे राकेशशर्मा इति नामकः अन्तरिक्षयात्री सोवियतसंघस्य 'सोयुजसोल्यत' नाम्नि अन्तरिक्षयाने चन्द्रयात्रादलस्य सदस्यः आसीत्।

वैभवः – किम् काचित् महिला तत्र न गतवती?

विभा – किं कथ्यते? कल्पनाचावला नाम्नी महिला तु द्विवारम् अन्तरिक्षयात्रां कृतवती।

वैभवः – सत्यम्, सा अन्तरिक्षयात्रां कृतवती। अग्रजे! अन्तरिक्षयात्रिणीं कल्पनाम् अधिकृत्य तु वर्धते मे जिज्ञासा।

(ततः प्रविशति आचार्यः)

उभौ – (उत्थाय) आचार्यः आगतः। गुरुवर्याय नमः।

आचार्यः – चिरं जीवतम्। वैभव! कस्य विषये वर्धते जिज्ञासा?

उभौ – आचार्य! आवाम् अन्तरिक्षयात्रिणीं कल्पनाम् अधिकृत्य ज्ञातुम् इच्छावः।

आचार्यः – साधु!साधु! अत्युत्तमा भवतोः जिज्ञासा। अद्य तु तस्याः जन्मदिवसः एव। 1961 तमे वर्षे जुलाईमासस्य प्रथमे दिवसे एषा जन्म लब्धवती। हरियाणाराज्यस्य करनालनगरस्य कल्पनाचावला भारतीयनारीणां गौरवभूता अस्ति। तस्याः मातुः नाम संयोगिता

वर्णितवन्तः = वर्णन किया है
अधिकृत्य = विषय में
वर्धते = बढ़ रही है
मे = मेरी
तदनन्तरं = उसके बाद
अभियान्त्रिकी = इन्जीनियरिंग
संजातः = सम्पन्न हुआ,
लब्धवती =प्राप्त किया

आसीत्। पिता बनारसीदासः भारतविभाजनात् अनन्तरं सपरिवारः करनालनगरं सम्प्राप्तः।



17.6

षोडशतिथौ = 16वीं तिथि को
आरब्धा = प्रारम्भ की
सम्यक् पृष्टम् = ठीक पूछा
अन्वेषणकार्यार्थम् = खोज के कार्य के लिए
सनाथितम् = साथ
यथानिर्दिष्टम् = निर्देशानुसार

विभा – धन्यौ एव तस्याः मातापितरौ। आचार्य! तया शिक्षा कुत्र प्राप्ता?

आचार्यः – करनाले एव टैगोरबालनिकेतनविद्यालये इयं प्रारम्भिकीशिक्षां प्राप्तवती। अस्याः वैमानिक्यां विशिष्टा रुचिः आसीत्। अतः सा पंजाब–अभियान्त्रिकीमहाविद्यालयात् वैमानिकीविषये स्नातकोपाधिम् अधिगतवती। तदनन्तरम् एषा विदुषी कालारोडो इति विश्वविद्यालये एरोस्पेस–अभियान्त्रिक्यां शोधकार्यस्य उपाधिं प्राप्तवती।

वैभवः – श्रीमन्! सा 'नासा' इति केन्द्रे कदा प्रवेशं लब्धवती?

आचार्यः – वस्तुतः "कर्मैव हि कर्तव्यं नास्ति सिद्धिरकर्मणः।" अतः 1988 तमे वर्षे सा 'नासा' (नेशनल एरोनॉटिक्स एण्ड स्पेस एडमिनिस्ट्रेशन) केन्द्रे द्रवगतिकी इति क्षेत्रे कार्यं प्रारभत। 1994 तमे वर्षे तत्रैव 'नासा' केन्द्रे विशेषज्ञरूपेण तस्याः नियुक्तिः जाता। 1995 तमे वर्षे कठिनतरं परीक्षानन्तरं 'नासा' अन्तरिक्षकेन्द्रे अन्तरिक्षयात्रायै अस्याः चयनं जातम्।

वैभवः – गुरुवर! तया कदा अन्तरिक्षयात्रायाः गौरवं लब्धम्?

आचार्यः – 1997 तमे वर्षे नवम्बरमासस्य विंशतितिथौ एषा अन्तरिक्षयात्रां विधाय भारतस्य द्वितीय–अन्तरिक्षयात्री इति गौरवम् अधिगतवती। कथ्यते हि दुर्लभान्यपि कार्याणि सिध्यन्ति प्रोद्यमेन हि।

विभा – किं सा पुनः अन्तरिक्षं गता?

आचार्यः – आम्, कोलम्बियाशटलयानेन 2003 तमे वर्षे जनवरी मासस्य षोडशतिथौ तया यात्रा पुनः आरब्धा।

वैभवः – आचार्य! किम् एतत् यानं किमपि विशिष्टम् आसीत्?

आचार्यः – वत्स! सम्यक् पृष्टम्। एतत् यानं तु अन्वेषणकार्यार्थं विविधैः यन्त्रैः सुसज्जितं, सप्तयात्रिभिः सनाथितम्

आसीत्। यथानिर्दिष्टं यानमिदं धवले स्वच्छे आकाशे ध्वनिवेगादपि अष्टादशगुणितवेगेन पृथ्वीतलात् अतिदूरम् उड्डीयमानम् आसीत् ततः ...

विभा – महोदय! ततः किम् अभवत्?

आचार्यः – किं कथयामि? एतत् यानं षोडशदिनानि कैंसररोगम् अधिकृत्य अपि च अन्येषु विषयेषु महत्त्वपूर्णसामग्री–संचयनं कृतवत्। दौर्भाग्येण फरवरीमासस्य प्रथमे दिवसे समस्तकार्यं समाप्य यानमिदं पृथिवीं प्रति अवतरणात् केवलं दशनिमेषपूर्वम् एव भस्मीभूतं जातम्। कल्पना चावला अपि तेन यानेन सह आकाशीया संजाता। नूनं कालाधीनमिदं जगत्।

वैभवः – अहो! अतीव दारुणा इयं दुर्घटना।

विभा – किं तस्यै सम्मानं दातुम् अस्माकं देशेन किञ्चित् कृतम्?

आचार्यः – आम्, तां प्रति श्रद्धाप्रसूनानि समर्पयता अस्माकं प्रधानमन्त्रिणा भारतीयअन्तरिक्ष– अनुसंधानकेन्द्रस्य (**इसरो**) अग्रिमोपग्रहस्य नाम 'कल्पना प्रथमः' इति उद्घोषितम्।

विभा वैभवः च– धन्या इयं भारतीया नारी।

महूर्तमपि जीवेत् नरः शुक्लेन कर्मणा।
न कल्पमतिकृष्णेन लोकद्वयविरोधिना।।

अष्टादशगुणितवेगेन = अठारह गुणा वेग से
उड्डीयमानम् = उड़ रहा था,
दौर्भाग्येन = दुर्भाग्य से
समाप्य = समाप्त करके
अवतारणात् = उतरने से
दशनिमेषपूर्वम् = दस क्षण पूर्व
भस्मीभूतम् = जल गया
आकाशीया = आकाश में रहने वाली
संजाता = हो गई
दारुणा = मन को दहलाने वाली
श्रद्धाप्रसूनानि = श्रद्धा के फूल
प्रदर्शयितुम् = प्रदर्शित करने के लिए
शुक्लेन कर्मणा = शुभ कर्म द्वारा
कल्पमपि = बहुत अधिक समय तक

## 17.2 बोधप्रश्नाः

1. पाठं पठित्वा रिक्तस्थानानि पूरयत

(क) ...................... इति नामकः भारतीयः सोवियतसंघस्य चन्द्रयात्रादलस्य सदस्यः आसीत्।

(ख) यदि अन्यस्मात् ग्रहात् अवलोक्यते तर्हि पृथ्वी अपि अन्यानि तारकाणि इव ... .......... प्रतीयते।

(ग) कल्पना चावला तु ...................... अन्तरिक्षयात्रां कृतवती।

(घ) कल्पनाचावला .................... जुलाईमासस्य प्रथमदिवसे जन्म लब्धवती।

(ङ) अस्याः .................... विशिष्टा रुचिः आसीत्।

(च) ...................... राज्यस्य कल्पना चावला भारतीयनारीणां गौरवभूता।

2. पाठात् चित्वा अधोलिखितानां विशेष्यपदानां विशेषणपदानि लिखत

   (क) ........................... ग्रहनक्षत्राणि।

   (ख) ........................... आकाशे।

   (ग) ........................... विषयेषु।

   (घ) ........................... कर्मणा।

   (ङ) ........................... दुर्घटना।

   (च) ........................... दिवसे।

3. 'अ' स्तम्भस्य वाक्यांशैः 'ब' स्तम्भस्य वाक्यांशानां मेलनं कुरुत

| 'अ' | 'ब' |
|---|---|
| (क) चन्द्रतारकैः सुशोभितम् | (i) सिध्यति प्रोद्यमेन हि। |
| (ख) एषा विदुषी 'कालारोडा' इति विश्वविद्यालये | (ii) सप्तयात्रिभिः सनाथितम् आसीत्। |
| (ग) दुर्लभान्यपि कार्याणि। | (iii) आकाशमण्डलं कियत् राजते। |
| (घ) एतत् यानं तु विविधैः यन्त्रैः सुसज्जितं | (iv) नरः शुक्लेन कर्मणा |
| (ङ) मुहूर्तमपि जीवेत् | (v) एरोस्पेस–अभियान्त्रिक्यां शोधकार्यस्य उपाधिं प्राप्तवती। |

## 17.3 अधुना अवगच्छामः

### प्रथमः अंशः

**वैभवः– भगिनि ............................................... जिज्ञासा।**

इदानीं प्रथमम् अंशं पुनः पठामः कानिचित् वैज्ञानिकरहस्यानि च जानीमः।

भवद्भिःअवश्यमेव दृष्टं भवेत् यत् रात्रौ चन्द्रतारकैः सुशोभितम् आकाशमण्डलं कथं राजते। किं जानन्ति भवन्तः यत् ग्रहनक्षत्रेषु अन्यतमा अस्माकं पृथ्वी अपि यदि अन्तरिक्षात् अवलोक्यते तर्हि सा अपि तारकैः इव देदीप्यमाना दृश्यते। वैज्ञानिकाः ग्रहनक्षत्राणां रहस्यानि ज्ञातुं प्रायः अन्तरिक्षयात्रां कुर्वन्ति। अस्माकं देशात् सर्वप्रथमं राकेशशर्मा तत्र अगच्छत्। तदनन्तरं कल्पनाचावला द्विवारं तत्र गतवती।

**सारः**

अनेके अन्तरिक्षगामिनः वैज्ञानिकाः अन्तरिक्षस्य यात्रां कृतवन्तः। अस्माकं देशात् सर्वप्रथमं राकेशशर्मा अन्तरिक्षं गतः। ततश्च कल्पनाचावला नाम्नी महिला द्विवारम् अन्तरिक्षयात्रां कृतवती।

अनेक अन्तरिक्षगामी वैज्ञानिकों ने अन्तरिक्ष की यात्रा की। हमारे देश से सर्वप्रथम राकेश शर्मा ने अन्तरिक्ष की उड़ान भरी। तत्पश्चात् कल्पना चावला नाम की महिला ने दो बार अन्तरिक्ष की यात्रा की।

## व्याकरणबिन्दवः

### संज्ञापदानि

अन्तरिक्षगामिनः = अन्तरिक्षगामिन् प्रथमा बहुवचनम्

चन्द्रतारकैः = चन्द्रः च तारकाणि च चन्द्रतारकाणि तैः

पृथिव्याः = पृथिवी, षष्ठी एकवचनम्

### क्रियापदानि

अवलोक्यते = अव √लुक् कर्मवाच्ये प्रथमपुरुषः एकवचनम्

राजते = √राज् आत्मनेपदी लट्लकारः प्रथमपुरुषः एकवचनम्

वर्तते = √वृत् आत्मनेपदी लट्लकारः प्रथमपुरुषः एकवचनम्

प्रतीयते = प्रति √इ कर्मवाच्ये यङ् प्रथमपुरुषः एकवचनम्

वर्धते = √वृध् (आत्मनेपदी) लट् प्रथमपुरुषः एकवचनम्

सन्ति = √अस् लट् प्रथमपुरुषः एकवचनम्

आसीत् = √अस् लङ् प्रथमपुरुषः एकवचनम्

जानासि = √जन् लट् मध्यमपुरुषः एकवचनम्

### कृदन्तप्रत्ययाः

ज्ञातम् = ज्ञा क्त नपु. प्रथमा एकवचनम्

प्राप्नुवन्तः = प्र आप् + क्तवतु पु. प्रथमा बहुवचनम्

वर्णितवन्तः = वर्ण् क्तवतु, पु. प्रथमा बहुवचनम्

गतवान् = गम् क्तवतु, पुल्लिंगम, प्रथमा एकवचनम्

गतवती = गम् क्तवतु, स्त्रीलिंगम् प्रथमा एकवचनम्

कृतवती = कृ क्तवतु, स्त्रीलिंगम् प्रथमा एकवचनम्

देदीप्यमाना = दीप् कर्म. शानच् स्त्रीलिंगम् एकवचनम्

## पाठगतप्रश्नाः 17.1

1. एकपदेन उत्तरत
   (क) विविधानि नक्षत्राणि कुत्र सन्ति?
   (ख) ग्रहनक्षत्रेषु का अन्यतमा वर्तते?
   (ग) कैः सुशोभितम् आकाशमण्डलं राजते?
   (घ) वैज्ञानिकाः अन्तरिक्षात् कस्याः सौन्दर्यं वर्णितवन्तः?
   (ङ) कल्पना चावला कस्मात् महाविद्यालयात् वैमानिकीविषये स्नातकोपाधिम् अधिगतवती।
   (च) का भारतीयमहिला अन्तरिक्षं गता?
2. कर्तृपदं चिनुत
   (क) चन्द्रतारकैः आकाशमण्डलं राजते।
   (ख) त्वम् कथं जानासि?
   (ग) अन्तरिक्षात् वैज्ञानिकाः पृथिव्याः सौन्दर्यं वर्णितवन्तः
   (घ) राकेशशर्मा 1984 तमे वर्षे चन्द्रयात्रादलस्य सदस्यः आसीत्।
   (ङ) आकाशमण्डले ग्रहनक्षत्राणि सन्ति।
   (च) अस्माकं पृथिवी तेषु अन्यतमा वर्तते।
3. निर्दिष्टधातुभिः सह क्त प्रत्ययप्रयोगेन वाक्यपूर्तिं कुरुत
   (क) अस्माकं देशात् सर्वप्रथमं राकेश शर्मा अन्तरिक्षं ––– (गम् + क्त)
   (ख) तैः पृथिव्याः सौन्दर्यं –––– (वर्ण् + क्त)
   (ग) कल्पनाचावलामहाभागया द्विवारम् अन्तरिक्षयात्रा ––– (कृ+क्त)
   (घ) तस्याः चयनम् अन्तरिक्षयात्रायै –– (जन् + क्त)
   (ङ) अनेके वैज्ञानिकाः अन्तरिक्षं ––– (प्र+आप्+क्त)

---

## द्वितीयः अंशः

इदानीं कल्पनायाः अध्ययनविषये बोधामः।

**ततः प्रविशति ........................... चयनं जातम्।**

हरियाणाराज्यस्य भारतीयनारीणां गौरवभूता कल्पनाचावला 1961 तमे वर्षे जुलाई मासस्य प्रथमे दिवसे जन्म लब्धवती। करनालनगरे टैगोरबालनिकेतनविद्यालये तया प्रारम्भिकी शिक्षा प्राप्ता। वैमानिकीविषये स्नातकोपाधिम् अधिगतवती। 'एरोस्पेस–अभियान्त्रिकी' इति विषये तया शोधकार्यं कृतम्। तदनन्तरं सा 'नासा' इति केन्द्रे प्रवेशं लब्धवती। तत्र

'द्रवगतिकी' इति क्षेत्रे विशेषज्ञरूपेण कार्यं कृतवती। 1995 तमे वर्षे अन्तरिक्षयात्रायै तस्याः चयनं जातम्।

**सारः**

भारतीयनारीणां गौरवभूता कल्पनाचावला हरियाणाराज्यस्य करनालनगरे 1961 तमे वर्षे जुलाईमासस्य प्रथमे दिवसे मातुः संयोगितायाः पितुः च बनारसीदासस्य गृहे जन्म लब्धवती। सा टैगोरबालनिकतने प्रारम्भिकशिक्षां प्राप्य पंजाबविश्वविद्यालयात् स्नातकोपाधिं प्राप्य 'कालारोडो' विश्वविद्यालये शोधकार्यं कृतवती। तदनन्तरं 'नासा' इति केन्द्रे तस्याः चयनम् अन्तरिक्षयात्रायै जातम्।

भारतीयनारियों की गौरवभूता कल्पनाचावला का जन्म हरियाणा के करनाल नगर में पहली जुलाई 1961 को माता संयोगिता और पिता बनारसीदास के घर हुआ। टैगोर बालनिकेतन में शिक्षा प्राप्त करके पंजाबविश्वविद्यालय से स्नातक होकर कालारोडो विश्वविद्यालय में शोधकार्य किया। इसके बाद 'नासा' केन्द्र में अन्तरिक्ष यात्रा के लिए इनका चयन हो गया।

## व्याकरणबिन्दवः

**सन्धिच्छेदाः**

नास्ति = न + अस्ति = अ + अ = आ दीर्घ सन्धिः

परीक्षानन्तरम् = परीक्षा + अनन्तरम् = आ + अ = आ दीर्घसन्धिः

स्नातकोपाधिकम् = स्नातक + उपाधिम् = अ + उ = ओ गुण सन्धिः

तत्रैव = तत्र + एव = अ + ए = ऐ वृद्धिसन्धिः

कर्मैव = कर्म + एव = अ + ए = ऐ वृद्धिसन्धिः

अत्युत्तमा = अति + उत्तमा = इ + स्वरः (उ) = 'इ' इत्यस्य 'य्' भवति। यणसन्धिः

सिद्धिरकर्मणः = सिद्धिः+अकर्मणः = : + अ = र विसर्ग सन्धिः

**पदपरिचयः**

नारीणाम् = नारी षष्ठी बहुवचनम्

भवतः = भवत् (पु.) षष्ठी एकवचनम्

अस्याः = इदम् स्त्रीलिंगम्, षष्ठी एकवचनम्

**क्रियापदानि**

इच्छसि = इष्, लट्, मध्यमपुरुषः, एकवचनम्

प्रारभत = प्र रभ्, (आत्मनेपदम्) लङ्, प्रथमपुरुषः, एकवचनम्

अकरोत् = कृ लङ् प्रथमपुरुषः, एकवचनम्

**कृदन्तप्रत्ययान्तशब्दाः**

| | | | |
|---|---|---|---|
| सम्प्राप्तः | = | सम् प्र आप् क्त पुल्लिंगम्, | प्रथमा एकवचनम् |
| प्राप्ता | = | प्र आप् क्त स्त्रीलिंगम्, | प्रथमा एकवचनम् |
| जातम् | = | जन् क्त पुल्लिंगम्, | प्रथमा एकवचनम् |
| लब्धवती | = | लभ् क्तवतु स्त्रीलिंगम्, | प्रथमा एकवचनम् |
| प्राप्तवती | = | प्र आप् क्तवतु स्त्रीलिंगम्, | प्रथमा एकवचनम् |
| अधिगतवती | = | अधि गम् क्तवतु स्त्रीलिंगम्, | प्रथमा एकवचनम् |

**उपपदविभक्तयः**

'अधि' योगे द्वितीया यथा **कल्पनाम्** अधिकृत्य वर्धते मे जिज्ञासा।
**विज्ञानम्** अधिकृत्य अहम् ज्ञातुम् इच्छामि।

'प्रति' योगे द्वितीया — सः **नगरं** प्रति गच्छति
**मातरं** प्रति अहं श्रद्धाकुसुमानि अर्पयामि।

'सह' योगे तृतीया — पुत्री **मात्रा** सह गता।
सीता **रामेण** सह वनम् अगच्छत्।

'नमः' योगे चतुर्थी — **गुरवे/गुरुवर्याय** नमः
**मातृ–पितृभ्यां नमः**

| **प्रथमान्तपदानि** | **सम्बोधनपदानि** |
|---|---|
| गुरुवरः | गुरुवर! |
| आचार्यः | आचार्य! |
| श्रीमान् | श्रीमन्! |
| महोदयः | महोदय! |
| भगिनी | भगिनि! |
| भ्राता | भ्रातः! |

## पाठगतप्रश्नाः 17.2

1. रेखांङ्कितम् आधृत्य प्रश्ननिमाणं कुरुत
   (क) कल्पनाचावला हरियाणराज्यस्य करनालनगरे जन्म लब्धवती
   (ख) तस्याः वैमानिक्यां विशिष्टा रुचिः आसीत्।
   (ग) सा 'कालारोडो' विश्वविद्यालयात् शोधकार्यस्य उपाधिं लब्धवती?

(घ) सा भारतीयनारीणां कीर्तिः जाता।

(ङ) 'नासा' केन्द्रे तस्याः नियुक्तिः जाता।

2. उदाहरणम् अनुसृत्य पुल्लिङ्गरूपस्थाने स्त्रीलिङ्गरूपं लिखत

| **पुल्लिङ्गम्** | **स्त्रीलिङ्गम्** |
|---|---|
| यथा सः अन्तरिक्षं गतवान् | सा अन्तरिक्षं गतवती। |
| (क) सः दिल्लीनगरे जन्म लब्धवान्। | ————————————। |
| (ख) सः विदेशे शिक्षां प्राप्तवान्। | ————————————। |
| (ग) सः नगरे स्नातकोपाधिम् अधिगतवान्। | ————————————। |
| (घ) सः शोध कार्यम् अपि कृतवान्। | ————————————। |
| (ङ) सः तत्र आगतवान्। | ————————————। |
| (च) सः फलं याचितवान्। | ————————————। |

3. सम्बोधनपदं प्रथमान्तपदं वा लिखत

| **प्रथमान्तपदम्** | **सम्बोधनपदम्** |
|---|---|
| (क) ———— | हे भ्रातः |
| (ख) गुरुवरः | ———— |
| (ग) ———— | ———— |
| (घ) अग्रजा | ———— |
| (ङ) ———— | श्रीमन् |
| (च) महोदयः | ———— |

## तृतीयः अंशः

इदानीं तृतीयम् अंशम् बोधामः।

**वैभवः— गुरुवरः ........................................ विरोधिना।।**

वयम् अवगच्छामः यत् सर्वप्रथमं कल्पनाचावला 1997 तमे वर्षे अन्तरिक्षं गता। 2003 तमे वर्षे सा पुनः तत्र गतवती। जनवरी मासस्य षोडषतिथौ ध्वनिवेगादपि अष्टादशगुणितवेगेन उड्डीयमानेन कोलम्बियाशटलयानेन सा सप्तसदस्यैः सह षोडशदिनानि यात्राम् अकरोत्। याने कैंसररोगम् अधिकृत्य सङ्कलिता सामग्री आसीत्। फरवरीमासस्य द्वितीये दिवसे पृथिवीं प्रति अवतरणात् केवलं दशनिमेषपूर्वं यानं दुर्घटनाग्रस्तं जातम्। सर्वेषां वैज्ञानिकानां मृत्युः अभवत्। वस्तुतः इदं जगत् कालस्य अधीनम्। तस्यै सम्मानं दातुम् अस्माकं प्रधानमन्त्रिणा भारतीयअन्तरिक्ष–अनुसन्धानकेन्द्रस्य (इसरो) अग्रिमोपग्रहस्य नाम 'कल्पना प्रथमः'' इति उद्घोषितम्।

पाठस्य अन्ते प्रदत्तं श्लोकं पुनः पठामः सम्यक् अवगच्छामः च–

महूर्तमपि जीवेत् नरः शुक्लेन कर्मणा।
न कल्पमतिकृष्णेन लोकद्वयविरोधिना।।

**पदच्छेदः** मुहूर्तम् अपि जीवेत् नरः शुक्लेन कर्मणा।
न कल्पम् अतिकृष्णेन लोकद्वयविरोधिना।।

**अन्वयः** नरः शुक्लेन कर्मणा मुहूर्तम् अपि जीवेत्। लोकद्वयविरोधिना अतिकृष्णेन (कर्मणा) कल्पम् अपि न (जीवेत्)।

**व्याख्या–** शुभ्रकर्मणा–शुभकर्मणा जीवितं मुहूर्त्तमपि = क्षणमपि = स्वल्पम् अपि जीवनं सार्थकम्, परम् इहलोके परलोके च विरोधिना अशुभकर्मणा कल्पपर्यन्तं दीर्घजीवनमपि निरर्थकम् भवति। अतः मानवेन सदा महत्कर्मपरायणेन भवितव्यम्। मृत्युः कदा आगमिष्यति इति न कोऽपि जानाति। अत एव उच्यते–

''गृहीत इव केशेषु मृत्युना धर्ममाचरेत्।''

कल्पनायाः स्वल्पमपि जीवनं तस्याः महत्कर्मभिः धन्यं जातम्। सा प×चत्वं गतापि यशः शरीरेण अद्यापि जीवति। उक्तमपि–

''कीर्तिर्यस्य स जीवति।''

**सारः**

कल्पनायाः अभिलाषा उद्यमेन दृढनिश्चयेन च पूर्णा जाता। सा द्विवारम् अन्तरिक्षं गता किन्तु द्वितीयायां यात्रायां तस्याः यानं दुर्घटनाग्रस्तं जातम्। यानस्य सदस्याः कैंसररोगस्य विषये अन्येषु च विषयेषु सामग्रीसंचयनं कृतवन्तः। सर्वे सदस्याः पंचत्वं गताः। अस्माकं प्रधानमन्त्री 'इसरो' केन्द्रस्य अग्रिमोपग्रहस्य नाम 'कल्पनाचावला प्रथमः' इति उद्घोषितवान्। शुक्लेन कर्मणा जीवतः नरस्य इहलोकः परलोकः च धन्यौ। दुष्कर्मणा दीर्घायुषा किम्?

परिश्रम और दृढ़निश्चय से कल्पना चावला की अभिलाषा पूर्ण हुई। उसने दो बार अन्तरिक्ष की उड़ान भरी किन्तु दूसरी उड़ान के समय विमान दुर्घटना ग्रस्त हो गया। यान के सदस्यों ने कैंसर रोग और अन्य विषयों पर महत्वपूर्ण सामग्री एकत्रित की थी। दुर्घटना में सभी सदस्यों की मृत्यु हो गई। हमारे प्रधानमन्त्री ने उन्हें सम्मान देने के लिए 'इसरो' केन्द्र के अग्रिम उपग्रह का नाम 'कल्पनाचावला प्रथम' रखने की घोषणा की। शुभकर्म करने वालों के इह लोक और परलोक दोनों धन्य हैं भले ही उनके जीवन की अवधि छोटी हो।

## व्याकरणबिन्दवः

### सन्धिच्छेदाः

अन्वेषणकार्यार्थम् = अन्वेषणकार्य + अर्थम् = अ + अ = आ (दीर्घसन्धिः)





| | |
|---|---|
| कालाधीनम् | = काल + अधीनम् = अ + अ = आ (दीर्घसन्धिः) |
| अग्रिमोपग्रहस्य | = अग्रिम + उपग्रहस्य = अ + उ = ओ (गुणसन्धिः) |
| दुर्लभान्यपि | = दुर्लभानि + अपि = 'इ' इत्यस्य स्थाने 'य्', स्वरे (अकारे) परे। (यण्सन्धिः) |

| **समस्तपदानि** | **विग्रहः** | **समासस्य नाम** |
|---|---|---|
| अन्तरिक्षयात्रायाः | अन्तरिक्षस्य यात्रायाः | षष्ठीतत्पुरुषः |
| दुर्लभकार्याणि | दुर्लभानि कार्याणि | कर्मधारयः |
| यथानिर्दिष्टम् | निर्दिष्टम् अनतिक्रम्य | अव्ययीभावः |
| प्रथमदिवसे | प्रथमे दिवसे | कर्मधारयः |
| अग्रिमोपग्रहस्य | अग्रिमस्य उपग्रहस्य | कर्मधारयः |

**संज्ञापदानि**

| | |
|---|---|
| विंशतितिथौ | = विंशतितिथि, सप्तमी एकवचनम् |
| प्रोद्यमेन | = प्र + उद्यम, तृतीया एकवचनम् |
| सप्तयात्रिभिः | = (सप्त) यात्रिन्, तृतीया बहुवचनम् |

**कृदन्तप्रत्ययाः**

| | |
|---|---|
| लब्धम् | √लभ् क्त नपु. प्रथमा एकवचनम् |
| प्रारब्धा | प्र √रभ् क्त स्त्रीलिंगम् प्रथमा एकवचनम् |
| उद्घोषितम् | उत् √घुष् क्त नपु. प्रथमा एकवचनम् |
| जातम् | √जन् क्त नपु. प्रथमा एकवचनम् |
| कृतम् | √कृ क्त नपु. प्रथमा एकवचनम् |
| सुसज्जितम् | सु + √सज्ज् क्त नपु. प्रथमा एकवचनम् |
| निर्दिष्टम् | निः √दिश् क्त नपु. प्रथमा एकवचनम् |
| समाप्य | सम् √आप् ल्यप् |
| विधाय | वि √धा ल्यप् |
| प्रदर्शयितुम् | प्र √दृश् णिच् तुमुन् |
| समर्पयिता | सम् √अर्प् णिच्, शतृ, तृतीया एकवचनम् |

## शब्दरूपाणि

**'इदम्' सर्वनामशब्दः**

| | (पुल्लिङ्गः) | | | स्त्रीलिङ्गः | | |
|---|---|---|---|---|---|---|
| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्र. वि. | अयम् | इमौ | इमे | इयम् | इमे | इमाः |
| द्वि. वि. | इमम् | इमौ | इमान् | इमाम् | इमे | इमाः |
| तृ. वि. | अनेन | आभ्याम् | एभिः | अनया | आभ्याम् | एभिः |
| च. वि. | अस्मै | आभ्याम् | एभ्यः | अस्यै | आभ्याम् | आभ्यः |
| पं. वि. | अस्मात् | आभ्याम् | एभ्यः | अस्याः | आभ्याम् | आभ्यः |
| ष. वि. | अस्य | अनयोः | एषाम् | अस्याः | अनयोः | असाम् |
| स. वि. | अस्मिन् | अनयोः | एषु | अस्याम् | अनयोः | आसु |

**इदम् (नपुंसकलिङ्गः)**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमाविभक्तिः | इदम् | इमे | इमानि |
| द्वितीयाविभक्तिः | इदम् | इमे | इमानि |

शेषः तु पुल्लिंगवत्

इदम्, अदस्, एतद्, तद् सर्वनाम्नां शुद्धप्रयोगार्थम् अधोलिखिता कारिका स्मरणीया–

इदमस्तु सन्निकृष्टं समीपतरवर्ति चैतदो रूपम्।
अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयात्।

अर्थात् – सन्निकृष्टार्थे (समीपार्थे) – 'इदम्' प्रयुज्यते।
– समीपतरार्थे – 'एतद्' प्रयुज्यते
– विप्रकृष्टार्थे (दूरार्थे) – 'अदस्' प्रयुज्यते।
– परोक्षे– 'तद्' प्रयुज्यते।

**'अदस्' सर्वनामशब्दः**

| | (पुल्लिंङ्गः) | | | स्त्रीलिङ्गः | | |
|---|---|---|---|---|---|---|
| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्र. वि. | असौ | अमू | अमी | असौ | अमू | अमूः |
| द्वि.वि. | अमुम् | अमू | अमून् | अमुम् | अमू | अमूः |
| तृ. वि. | अमुना | अमूभ्याम | अमीभिः | अमुया | अमूभ्याम् | अमूभिः |
| च. वि. | अमुष्मै | अमूभ्याम् | अमीभ्यः | अमुष्यै | अमूभ्याम् | अमूभ्यः |
| पं. वि. | अमुष्मात् | अमूभ्याम् | अमीभ्यः | अमुष्याः | अमूभ्याम् | अमूभ्यः |
| ष. वि. | अमुष्य | अमुयोः | अमीषाम् | अमुष्याः | अमुयोः | अमूषाम् |
| स. वि. | अमुस्मिन् | अमुयोः | अमीषु | अमुष्याम् | अमुयोः | अमूषु |

### नपुंसकलिङ्गः

प्र. वि., द्वि. वि. – अदः अमू अमूनि

शेषः पुल्लिवत्।

### 'विद्वस् शब्दः' (पुल्लिङ्गः)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमाविभक्तिः | विद्वान् | विद्वांसौ | विद्वांसः |
| द्वितीयाविभक्तिः | विद्वांसम् | विद्वांसौ | विदुषः |
| तृतीयाविभक्तिः | विदुषा | विद्वद्भ्याम् | विद्वद्भिः |
| चतुर्थीविभक्तिः | विदुषे | विद्वद्भ्याम् | विद्वद्भ्यः |
| पंचमीविभक्तिः | विदुषः | विद्वद्भ्याम् | विद्वद्भ्यः |
| षष्ठीविभक्तिः | विदुषः | विदुषोः | विदुषाम् |
| सप्तमीविभक्तिः | विदुषि | विदुषोः | विद्वत्सु |
| सम्बोधनम् | हे विद्वन्! | हे विद्वांसौ! | हे विद्वांसः! |

## पाठगतप्रश्नाः 17.3

1. पूर्णवाक्येन उत्तरत–
   (क) कल्पनाचावला प्रथमवारं कदा अन्तरिक्षं गता?
   (ख) केन यानेन तया द्वितीया यात्रा कृता?
   (ग) यानं कति दिनानि अन्तरिक्षे उड्डीयमानम् आसीत्?
   (घ) कस्य रोगस्य विषये सामग्रीसंचयनं कृतम्?
   (ङ) कस्य अधीनम् इदं जगत्?
2. अधोलिखितं गद्यांशं पठित्वा तदाधारितप्रश्नान् उत्तरत–
   ताम् प्रति श्रद्धाप्रसूनानि समर्पयता अस्माकं प्रधानमन्त्रिणा भारतीय–अन्तरिक्ष–अनुसंधानकेन्द्रस्य (इसरो) अग्रिमोपग्रहस्य नाम 'कल्पनाचावला प्रथमः' इति उद्घोषितम्।
   (क) अत्र 'ताम्' इति पदं कस्यै प्रयुक्तम्?
   (ख) पुष्पाणि इत्यस्य किं पर्यायवाचिपदं गद्यांशे प्रयुक्तम्?
   (ग) 'प्रति' योगे अत्र का उपपदविभक्तिः प्रयुक्ता?
3. अधोलिखितकर्तृवाच्यान्तवाक्यानां समक्षं कर्मवाच्यान्तं रूपं लिखत
   (क) कल्पना तु भारतस्य 'द्वितीय–अन्तरिक्षयात्री' इति गौरवम् अधिगतवती।
   (ख) त्वम् सम्यक् पृष्टवान्।

(ग) यानम् अनेकेषु विषयेषु सामग्रीसंचयं कृतवत्।

(घ) सा यात्रां प्रारब्धवती।

(ङ) प्रधानमन्त्री अन्तरिक्ष–अनुसंधानकेन्द्रस्य नाम 'कल्पना चावला प्रथमः' इति उद्घोषितवान्।

## 17.4 किम् अधिगतम्

- परिश्रमेण दुर्लभानि कार्याणि अपि सिध्यन्ति।
- महद्विभूतीनां लक्षणानि बाल्ये एव दृश्यन्ते।
- नारी अपि पुरुषः इव सबला सफला च।
- गुणाः पूजास्थानं गुणिषु न च लिङ्गम् न च वयः।
- 'प्रति'–'अधि' योगे द्वितीया, 'सह' योगे तृतीया, 'नमः' योगे चतुर्थी विभक्तिः भवति।
- भूतकालस्य अर्थे क्त–क्तवतु प्रत्यययोः प्रयोगः भवति।
- इदम्, अदस् सर्वनाम शब्दयोः रूपाणि त्रिषु लिंगेषु भवन्ति।

## 17.5 योग्यताविस्तारः

### (क) लेखकपरिचयः

संस्कृतभाषायाः प्रचार–प्रसारार्थं सततं निरतानां श्री शङ्करलाल शास्त्रिणां जन्म राजस्थानप्रान्तस्य सीकरमण्डलस्य किशोरपुराग्रामे श्रीमतां पं. श्री लक्ष्मीनारायणशर्मणां गृहे समजायत। अमीभिः प्रणीताः ग्रन्थाः सन्ति– 1. संस्कृत कवि मञ्जरी (चम्पूकाव्यम्) 2. संस्कृत–कथा–मन्दाकिनी 3. कविता–निर्झरी, 4. राजस्थान के संस्कृत कृतिकार 5. संस्कृत साहित्य का संक्षिप्त इतिहास 6. संस्कृत वाङ्मय में पर्यावरण।

अयम् राजस्थान संस्कृतानुसन्धान संस्थानात प्रकाशितायाः ''सौवर्णी'' इत्याख्यायाः शोधपत्रिकायाः संपादकः वर्तते। श्री शास्त्री संप्रति राजस्थान संस्कृतानुसन्धान संस्थाने (शाहपुरोनगरे) निदेशकपदे कार्यरतः अस्ति।

### (ख) भावविस्तारः

'कल्पना' तु वैमानिकक्षेत्रेऽद्भुतसाहसस्य प्रतीका। सा भारतस्य नारीजातेः च गौरवभूता। तस्याः कीर्तिः अमरा। सत्यमेव कल्पनाकीर्तिर्विजयते।

अस्माभिः विविधपुस्तकेभ्यः 'इन्टरनैट' माध्यमेन वा अन्तरिक्षविज्ञानविषयकं ज्ञानम् अर्जनीयम्। कल्पनाचावला सदृशी महिला सुनीताविलियम अपि अस्मिन् क्षेत्रे

प्रसिद्धिं प्राप्तवती। सा अन्तरिक्षयात्रां कृत्वा सकुशलं प्रत्यागच्छत्। राष्ट्रगौरव–ञ्चावर्धयत्।

**(ग) भाषाविस्तारः**

काव्यशास्त्रदृष्ट्या भाषा भावपूर्णा प्रसादगुणोपेता वैदर्भीरीतियुता स्यात्। भावप्रधानोऽयं निबन्धः सरस–सुगम–प्राञ्जल भाषया निबद्धः।

## 17.6 पाठान्तप्रश्नाः

1. अधोलिखितानि वाक्यानि घटनाक्रमानुसारं पुनः लिखत
   (क) कोलम्बियाशटलयानेन 2003 तमे वर्षे जनवरीमासस्य षोडशतिथौ तया यात्रा पुनः प्रारब्धा।
   (ख) कल्पना चावला अपि तेन यानेन सह आकाशीया संजाता।
   (ग) 1997 तमे वर्षे नवम्बरमासस्य विंशतितिथौ एषा अन्तरिक्षयात्रां विधाय 'भारतस्य द्वितीय–अन्तरिक्ष यात्री' इति गौरवम् अधिगतवती।
   (घ) 1961 तमे वर्षे जुलाईमासस्य प्रथमे दिवसे एषा जन्म लब्धवती।
   (ङ) 1988 तमे वर्षे सा नासा इति केन्द्रे प्रवेशं लब्धवती।
   (च) कल्पना चावला नाम्नी महिला तु द्विवारम् अन्तरिक्षयात्रां कृतवती।
   (छ) करनाले टैगोरबालनिकेतनविद्यालये इयं प्रारम्भिकशिक्षां प्राप्तवती।
   (ज) प्रधानमन्त्रिणा 'इसरो' इति केन्द्रस्य अग्रिमोपग्रहस्य नाम 'कल्पना चावला प्रथमः' इति उद्घोषितम्।
2. अधोलिखितेषु वाक्येषु कोष्ठकान्तर्गतशब्देषु उपपदविभक्तिं प्रयुज्य रिक्तस्थानपूर्तिः क्रियताम्
   (क) ––––––––(आचार्य) नमः।
   (ख) –––––––(कल्पना) अधिकृत्य वर्धते मे जिज्ञासा।
   (ग) सा ––––––(यान) सह आकाशीया संजाता।
   (घ) अस्माकं प्रधानमन्त्रिणा ––––– (तद्) प्रति श्रद्धाप्रसूनानि समर्पयता 'इसरो' केन्द्रस्य अग्रिमोपग्रहस्य नाम 'कल्पना चावला प्रथमः' इति उद्घोषितम्।
3. कोष्ठकात् उचितम् अव्ययपदं चित्वा रिक्तस्थानानि पूरयत
   (मा, ततः, कुत्र, नूनं, तर्हि, कथम्)
   (क) ––––– प्रविशति आचार्यः।
   (ख) अरे! ––––––– एवं वद।
   (ग) –––––कालाधीनम् इदं जगत्।
   (घ) तया शिक्षा –––––––प्राप्ता ?

(ङ) अये! त्वया ———ज्ञातम्?

(च) यदि पठिष्यति—— उत्तीर्णः भविष्यति।

4. अधोलिखितवाक्येषु लङ्लकारस्य स्थाने 'क्तवतु' प्रत्ययस्य प्रयोगं कृत्वा पुनः लिखत

(क) रूसदेशवास्तव्यः यूरी गागरिनः सर्वप्रथमम् अन्तरिक्षम् अगच्छत्।

(ख) वयं वायुयानात् पृथिव्याः सौन्दर्यम् अपश्याम।

(ग) सा वैमानिकीविषये शोधकार्यम् अकरोत्।

(घ) अनेके वैज्ञानिकाः अन्तरिक्षं प्राप्नुवन्।

(ङ) वैज्ञानिकाः अनेकेषु विषयेषु सामग्रीसंचयनम् अकुर्वन्।

(च) कल्पना चावला 1961 तमे वर्षे जन्म अलभत।

5. इमं पाठं पठित्वा भवद्भिः का प्रेरणा प्राप्ता? प×चवाक्येषु लिखत।

6. निर्देशानुसारम् उपयुक्तेन पदेन रिक्तस्थानानि पूरयत

(क) ............................ ('इदम्' नपुं.) शोभनं नगरम्।

(ख) ............................ ('इदम्' पुं.) बालकेन सह कश्चित् अपि मित्रतां न करोति।

(ग) ............................ ('इदम्' स्त्री.) आम्रं न रोचते।

(घ) ............................ ('इदम्' स्त्री.) बालिकानां सौन्दर्यं दर्शनीयम्।

(ङ) ............................ ('इदम्' पुं.) सैनिकयोः वीरता प्रशंसनीया वर्तते।

(च) ............................ ('अदस्' पुं.) पराक्रमी राजा अस्ति।

(छ) ............................ ('अदस्' पुं.) बालाय हितं क्षीरः।

(ज) ............................ ('अदस्' स्त्री.) नगर्यां सज्जनाः निवसन्ति।

(झ) ............................ ('अदस्' पुं.) जानात् भीतः बालकः रोदिति।

(ञ) ............................ ('अदस्' स्त्री.) नारीभिः विजयश्रीः प्राप्ता।

7. निम्नलिखितश्लोकेषु विद्वस् शब्दस्य रूपाणि चित्वा तेषां विभक्तिं वचनं च निर्दिशत

स्वदेशे पूज्यते राजा विद्वान् सर्वत्रपूज्यते।
देशान्तरेऽपि विद्वांसं पूजयन्ति जनाः श्रिया।।
सङ्गतिं विदुषा कुर्याः श्रद्धया विदुषेऽर्पयेः।
लभस्व विदुषो ज्ञानं विदुषो वाक्यमाचर।।
श्रद्धा विदुषि ते भूयात् प्रियो विद्वन् त्वमेव मे।
विद्वांसः सर्वदा वन्द्या वाग्वैभव—विभूषिताः।।

## 17.7 उत्तराणि

**17.3 बोधप्रश्नाः**

1. (क) राकेशशर्मा (ख) देदीप्यमाना (ग) द्विवारं (घ) 1961 तमे वर्षे (ङ) वैमानिक्याम् (च) हरियाणा







2. (क) विविधानि, (ख) स्वच्छे, (ग) विषयेषु, (घ) शुक्लेन, (ङ) दारुणा, (च) प्रथमे
3. (क) iii, (ख) v, (ग) i, (घ) ii, (ङ) iv

**पाठगतप्रश्नाः**

**17.1** 1. (क) आकाशमण्डले (ख) पृथ्वी (ग) चन्द्रतारकैः (घ) पृथिव्याः
(ङ) पंजाब अभियान्त्रिकी महाविद्यालयात् (च) कल्पनाचावला

2. (क) आकाशमण्डलम् (ख) त्वम् (ग) वैज्ञानिकाः (घ) राकेशशर्मा (ङ) ग्रहनक्षत्राणि
(च) पृथिवी

3. (क) गतः (ख) वर्णितम् (ग) कृता (घ) जातम् (ङ) प्राप्ताः

**17.2** 1. (क) कल्पनाचावला कुत्र जन्म लब्धवती?
(ख) तस्याः कस्यां विशिष्टा रुचिः आसीत्?
(ग) सा कालारोडो विश्वविद्यालयात् कस्य उपाधिं लब्धवती?
(घ) सा कासाम् भूषणं जाता?
(ङ) कस्मिन् केन्द्रे तस्याः नियुक्तिः जाता?

2. (क) सा दिल्लीनगरे जन्म लब्धवती
(ख) सा विदेशे शिक्षां प्राप्तवती
(ग) सा नगरे स्नातकोपाधिम् अधिगतवती
(घ) सा शोधकार्यम् अपि कृतवती।
(ङ) सा तत्र आगतवती
(च) सा फलं याचितवती।

3. (क) भ्राता (ख) गुरुवर (ग) विभा (घ) अग्रजे (ङ) श्रीमान् (च) महोदय

**17.3** 1. (क) कल्पनाचावला प्रथमवारं 1997 तमे वर्षे अन्तरिक्षं गता।
(ख) कोलम्बियाशटलयानेन तया द्वितीया यात्रा कृता।
(ग) यानम् षोडश दिनानि अन्तरिक्षे उड्डीयमानम् आसीत्।
(घ) कैंसररोगस्य विषये सामग्रीसंचयनं कृतम्।
(ङ) कालाधीनम् इदम् जगत्।

2. (क) अत्र ताम् इति पदं 'कल्पनाचावला' इति कृते प्रयुक्तम्।
(ख) प्रसूनानि।
(ग) 'प्रति' योगे द्वितीया विभक्तिः प्रयुक्ता।

3. (क) तया भारतस्य द्वितीय–अन्तरिक्ष यात्री इति गौरवम् अधिगतम्।
(ख) त्वया सम्यक् पृष्टम्।
(ग) यानेन अनेकेषु विषयेषु सामग्रीसचयनं कृतम्।
(घ) तया यात्रा प्रारब्धा।

(ङ) प्रधानमन्त्रिणा अन्तरिक्ष– अनुसंधानकेन्द्रस्य नाम 'कल्पना चावला प्रथमः' इति उद्घोषितम्।

**17.6 पाठान्तप्रश्नाः**

1. (च), (घ), (छ), (ङ), (ग), (क), (ख), (ज)
2. (क) आचार्याय (ख) कल्पनाम् (ग) यानेन (घ) ताम्
3. (क) ततः (ख) मा (ग) नूनं (घ) कुत्र (ङ) कथम् (च) तर्हि
4. (क) रूसदेशवास्तव्यः यूरीगागरिनः सर्वप्रथमम् अन्तरिक्षं गतवान्।
   (ख) वयं वायुयानात् पृथिव्याः सौन्दर्यं दृष्टवन्तः।
   (ग) सा वैमानिकीविषये शोधकार्यं कृतवती।
   (घ) अनेके वैज्ञानिकाः अन्तरिक्षं प्राप्नुवन्तः।
   (ङ) वैज्ञानिकाः अनेकेषु विषयेषु सामग्रीसंचयनं कृतवन्तः।
   (च) कल्पना चावला 1961 तमे वर्षे जन्म लब्धवती।
5. स्वयं कुरुत
6. (क) इदम् (ख) अनेन (ग) अस्यै (घ) आसाम् (ङ) अनयोः (च) असौ (छ) अमुष्यै (ज) अमुष्याम् (झ) अमुष्यात् (×ा) अमूभिः
7. (i) विद्वान् – प्र. वि., ए. व.
   (ii) विद्वांसम् – द्वि. वि., ए. व.
   (iii) विदुषा – तृ. वि., ए. व.
   (iv) विदुषे – च. वि., ए. व.
   (v) विदुषः – ष. वि., ए. व.
   (vi) विदुषः – ष. वि., ए. व.
   (vii) विदुषि – स. वि., ए. व.
   (viii) विद्वन् – सम्बोधनम्, ए. व.
   (ix) विद्वांसः – प्र. वि., बहुवचनम्